Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 6 | ISSN : 2581- 6306

# व्याकरणशास्त्रे परिभाषाणां स्वरूपं महत्वञ्च

डॉ. कैलाशचन्द्रसैनी
सहायकाचार्यः, शिक्षाशास्त्रम्, केन्द्रीयसंस्कृतविश्वविद्यालयः,जयपुरपरिसरः, जयपुरम्।

**शोधसारांशः–** शास्त्रशेषकथने ताः परिभाषाः निरूप्यन्ते याः पूर्वोक्तप्रकरणद्वये निरुपितावशिष्टाः वर्तन्ते । एवं श्रीमता नागेशभट्टेन परिभाषेन्दुशेखरे परिभाषाविषयकं सर्वसिद्धान्तं सम्यक् समीक्ष्य यथार्थपर्यालोचनपूर्वकं सविशदं तत्स्वरूपम् उपस्थापितम् ।

**मुख्यशब्दाः** – परिभाषाः, महाभाष्यम्, प्रक्रियाग्रन्थः, मञ्जूषा, पाणिनि, व्याकरणशास्त्रम्।

पाणिनेः व्याकरणाष्टाध्यायीम् अधिकृत्य अनेकैः वैयाकरणाचार्यैः अनेके काशिका, **महाभाष्यम्, प्रक्रियाग्रन्थः, मञ्जूषा**, परिभाषापाठश्चेत्यादि प्रणीताः । तत्र परिभाषापाठानां कुत उद्गम इत्यपेक्षायां किमपि समाधानं अद्यावधिपर्यन्तं साक्षात् न उपलभ्यते। यतः पूर्ववर्तिभिः वैयाकरणाचार्यैः एतस्य ग्रहणं कृतं स्यात्। अनुमीयते यत् प्राचां व्याकरणग्रन्थेषु विशिष्टसूत्ररुपेण समाविष्टेभ्यः सूत्रेभ्यः एवैषः परिभाषापाठः सङ्कलितः स्यात। विषयेऽस्मिन् परिभाषावृत्तौ सीरदेवः स्वाभिमतम् अनेन प्रकारेण निर्दिशति– **परिभाषा हि नाम न साक्षात् पाणिनीयवचनानि**। किं तर्हि? नानाचार्याणाम्। त्रिकाण्डशेष- कोषादिग्रन्थकर्तुः पुरुषोत्तमदेवस्य अपि अयमेवाशयः। किन्तु वैद्यनाथपायगुण्डे महोदयः परिभाषापाठानां मूलं प्राचीनानि ऐन्द्रप्रभृतितन्त्राणि स्वीकरोति ।

मुख्यतया विद्वद्भिः काशकृत्सन व्याडि पाणिन्यादयः परिभाषाप्रवक्ताचार्याः मन्यन्ते। तत्रापि **काशकृत्सन** (3100 वि. पू.) प्रोक्तः परिभाषापाठस्तु साम्प्रतं नोपलभ्यते । **व्याडिः ( 2950 वि. पू.)** विरचितस्तु परिभाषावृत्ति नामको ग्रन्थः सम्प्रति समुपलभ्यते । **पाणिनिः (2900 वि. पू. )** परिभाषापाठस्य च साक्षत्प्रवक्ता वर्तते। तस्यापि परिभाषापाठस्य मूलरूपं तु अद्यावधिनोपलब्धम्। तस्य हि कात्यायनपतञ्जलिवचनरूपवाचनिकपरिभाषायोगसञ्जातमिश्रितरूपमेव दृश्यते ।

हरदत्तस्य परिभाषाप्रकरणं, पुरुषोत्तमदेवस्य परिभाषावृत्तिः, भीमस्य परिभाषार्थमञ्जरी, वैद्यनाथस्य लघुवृत्तिः, ललितावृतिश्च, सीरदेवस्य वृहत् परिभाषावृत्तिः यदुपरि श्रीमान् शर्मणो विजयाख्या व्याख्या, रामभद्रदीक्षितस्य परिभाषाप्रकाश व्याख्या अज्ञातनाम्नः रामभद्रव्याख्या, विष्णुशेषस्य परिभाषासङ्ग्रहः वर्तते । नीलकण्ठस्य परिभाषावृतिः भीमस्य परिभाषार्थमञ्जरी वैद्यनाथस्य परिभाषार्थसङ्ग्रहः यस्योपरि प्रकाशनन्दस्य चन्द्रिका वर्तते ।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

अप्पदीक्षितस्य सारबोधनी च टीके, धर्मसूरिमहोदयस्य परिभाषार्थप्रकाशिका, अप्पासुधीमहोदयस्य परिभाषारत्नं, शेषाद्रिसुधीमहोदयस्य परिभाषाभास्करः, अज्ञातनाम्नः परिभाषाविवरणम्, रामप्रसादद्विवेदिमहोदयस्य सार्थपरिभाषापाठः, गोविन्दाचार्यस्य परिभाषार्थप्रदीपः, नागेशभट्टस्य परिभाषेन्दुशेखरो यदुपरि वैद्यनाथस्य गदा व्याख्या, शिवरामस्य लक्ष्मी-विलासः, विश्वनाथभट्टस्य चन्द्रिका ब्रह्मानन्दस्य चित्प्रभा, राघवेन्द्राचार्यस्य त्रिपथगा, वेंङ्कटेशपुत्रस्य त्रिपथगा, भैरवमिश्रस्य भैरवी, शेषशर्मणः सर्वमङ्गला, शङ्करभट्टस्य शाङ्करी, विजया, अभ्यङ्कर-
पटवर्धनतात्याशास्त्रीमहोदयस्य भूतिः, जयदेवमिश्रस्य वासुदेवमहोदयस्य तत्वादर्शः, लक्ष्मीनृसिंहस्य त्रिशिखा, विष्णुभट्टस्य चिच्चन्द्रिका, भीमभट्टस्य भैमी, उदयङ्करस्य परिभाषाप्रदीपार्चिः, हरिभास्करशिष्यस्य लघुपरिभाषावृत्तिः च टीकाः सन्ति।

**परिभाषाऽर्थ :- "परितो भाष्यते या सा** परिभाषा " कं परितः ? किं परित? कां परितः? इति प्रश्नोद्भवे सति इतिहास एव प्रमाणम् । पुरा प्रातिशाख्ये वेदशास्त्रमधिकृत्य विरचितं वैदिकव्याकरणं प्रथमं प्रमाणम् । तत्र भाषा वेद भाषा एव, अतः वेदभाषां परितः। इत्यादिना परिभाषापदं योगरूढम् अपि स्वीकर्तुं शक्यते । परिभाषाशास्त्रेण व्याकरणनियमाः निर्दूष्यन्ते तस्माद् **"अनियमे नियमकारिणि"** इति परिभाषा लक्षणं गतार्थं भवति । तथाहि विध्यादिशास्त्र तात्पर्यप्रकाशकत्वे सति शब्दसाधुत्वप्रयोजकत्वमसाधुत्वशब्दप्रवृत्याप्रयोजकत्वंसं-ज्ञातिदेशादिशास्त्रभिन्नत्वं परिभाषात्वम् इत्यपि फलति । परिभाषायाः अन्यदपि लक्षणं तद्यथा –

**"लिङ्गत्वे सति नियामकत्वम् इत्यपि शाब्दिकैरुच्यते"** । नियामकत्वमित्यस्य अनियमे यमकारिणीत्वमित्यर्थः। अनियमत्वन्नाम न्यूनाधिकवृत्तित्वम्।

तत्र परिभाषा न्यूनाधिकलक्ष्यदेशे गन्तुं प्रवृत्तं विधिसूत्रं नियम्य यथादेशं यथालक्ष्यं वा प्रवर्तयति । अत एव इयं नियमकारिणीत्युच्यते । इयञ्च लिङ्गं दृष्ट्वा प्रवर्तते अतो लिङ्गवतीत्युच्यते यथा – **"तस्मिन्निति निर्दिष्टे पूर्वस्य" (1/1/66) " असिद्धं बहिरङ्गमन्तरङ्गे "** (51 प.शे.) इत्यादिः । अत्र अचीति सप्तमीनिर्देशरूपं लिङ्गं दृष्ट्वा तस्मिन्निति प्रवर्तते प्रवृत्य च **"इकोयणचि"** (6/1/77) इत्यौपश्लेषिकाधार सप्रमीत्वादनुपश्लिष्टस्येको यण् इत्यर्थे अजव्यवहितपूर्वस्येत्यस्योपस्थानेन अजव्यवहित पूर्वत्वविशिष्टस्य इको यण स्यादित्यर्थः सम्पादयति ।

परिभाषाविषये यद्यपि भगवता पतञ्जलिना परिभाषा लक्षणं नैवोपपादितं तथापि परिभाषामधिकारविशेषं मन्वानः **"षष्ठी स्थानेः योगाः"** इति सूत्र व्याख्यान प्रसङ्गे निर्दिशति **" अधिकारोनाम त्रिप्रकारः "** । **कश्चित् एकदेशस्थः सर्वं शास्त्रमभिज्वलयति यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्म अभिज्वलयति।**

महाभाष्योक्तं वचनमनुश्रित्य हरदत्तेनापि लिखितम्- **परितः सर्वत्र पूर्वत्र व्यवह्रियते नान्तरे च भाष्यते कार्यमनया सा परिभाषा।** एतेनापि सिद्धयति यत् विध्यादिशास्त्रय तात्पर्यं प्रकटयितुं सहायिका भवति यच्च

विधिशास्त्रस्य प्रकृतिः शब्दसाधुत्वं प्रति प्रयोजयति असाधुत्वाच्च वारयति सा परिभाषेत्युच्यते ।

एवं व्याकरणे परिभाषाणां प्रामुख्येन एकमेवकार्यं भवति, शब्दशास्त्रगतनियमितत्वस्य परिष्करणम् अनियमितत्वस्य नैकविधित्वात् परिभाषाणामेव नैकविधं कार्यस्थलं प्रवृत्तिबीजञ्चावलोक्य सर्वाङ्गं वर्गीकरणं विधाय ताः त्रिषुभागेषु विभक्ताः। तद्यथा–

**1.ज्ञापकसिद्धाः**

**2.न्यायसिद्धाः**

**3.वाचनिकाः**

एतदुद्दिश्य महावैयाकरणः नागेशभट्टः परिभाषेन्दुशेखरस्य प्रारम्भे लिखति– प्राचीनव्याकरणतन्त्रे वाचनिकानि अत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्तिकयोरूपनिबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते।"

इह च काचित् परिभाषा न्यायमूला । यथा– **"अर्थवदग्रहणे नानर्थकस्य ग्रहणम्।"** काश्चित्तु वचनमूलाः यथा– लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम् इति।

**ज्ञापकसिद्धाः–** ज्ञापकसिद्धायाः परिभाषायाः प्रधानरूपेण भेदद्वयं वर्तते।–

(क) निर्देशानुपपत्तिज्ञापकसाधिता

(ख) अर्थानुपपत्तिज्ञापिता च

सूत्रेषु सूत्रार्थेषु वा प्रतिपादितोऽर्थः यमर्थं बिना अपूर्णो प्रतिभाति स तस्य ज्ञापकत्वे नाङ्गीक्रियते। ज्ञापक ज्ञापितार्थेन संदेहमपाकरोति । कानिचित् सूत्राणि तान्यपि सूत्राणि तस्यार्थस्य ज्ञापकानि भवन्ति । यस्यार्थ स्वीकरणे तच्छक्स्यावश्यकत्वं स्यात् । अस्त्येषामभिप्रायः वर्णेनाप्यनर्थकेन भवितव्यम् इति भाष्यकारोक्तदिशा भगवतः पाणिनेः सूत्रार्थं सार्थक्याय यथाऽपेक्षिता कल्पना आवश्यकी । इयमेव धारणा वर्तते परिभाषाजनने। आचार्यनागेशेन स्वीकृताः ज्ञापकसिद्धाः परिभाषा प्रायशः चतुष्पञ्चाशत् संख्यात्मिकाः वर्तते ।

**न्यायसिद्धाः**– अत्र न्यायशब्दस्यार्थः लोकन्यायः कर्तव्यः । लोके प्रसिद्धत्वान्याय सिद्धायाः परिभाषायाः कृते ज्ञापकस्यापेक्षा न भवति । यथा – "**छिन्ने पुच्छे नाश्वो न च गर्दभः**, **व्यपदेशिवदेकस्मिन्**" इत्यादि परिभाषा लोकन्यायसिद्धा एव एवं विधा परिभाषा सप्तत्रिंशत् संख्यात्मिकाः वर्तन्ते। यासु अष्टादशलोकन्यायमूलाः एकोनविंशति संख्यात्मिकाश्च न्यायसिद्धा युक्तिसिद्धाः वा परिभाषोच्यते ।

लोकन्यायसिद्धापरिभाषा यथा "**कार्यमुनभवन् हि कार्यी निमित्ततया"** नाश्रीयते। अत्र "**स्थण्डिलाच्छयितरि वृते"** इति सूत्रेणे शयितरि प्रयोगमुद्दिश्य ज्ञापकसिद्धा प्रथमम् उक्ता परन्ते नैषा ज्ञापकसाध्या सकललोकतन्त्र प्रसिद्धत्वादिना लोकन्याय एव स्वीकृता:। काश्चन न्यायसिद्धा: युक्तिसिद्धा: वा परिभाषा यथा **अर्थवद्ग्रहणे नानार्थकस्य ग्रहणम्**। **ताकृतप्रसङ्गिनित्यम्** तद् विपरीतमनित्यम् इत्यादया:' परिभाषा: सन्ति।

**वाचनिकी परिभाषा-** वचनरूपेण या परिभाषा पठिता: सन्ति ता: परिभाषा: वाचनिक्य: परिभाषा उच्यन्ते भगवता पाणिनिना पतञ्जलिना कात्यायनेन च साक्षात्प्रोक्ता: परिभाषा: रूपान्तरेण प्रकारान्तरेण वा सूत्रार्थवचनमिवप्रतीयमानोक्तयश्च वाचनिकी परिभाषात्वेन बोध्यते। एवंरूपा परिभाषा: त्रिमुनिवचनमाधारीकृत्या: भवन्ति । तद्यथा " **इकोगुणवृद्धि: (1/1/3)** पाणिनिमुखोद्गतत्वात् वाचनिकी। एवमेव **"सन्निपातलक्षणोविधिरनिमितं तद्विघातस्य"** ( प. 86 प. शे. ) अत: एवं भूता: या: परिभाषा: सन्ति ता: सर्वा अपि वाचानिका: सन्ति । चतुर्विंशंत्यात्मकास्वासु परिभाषासु चतुर्दशसंख्यात्मिका: परिभाषा: वचनरूपेण पठिता: सन्ति । दशसंख्यात्मिकाश्च सूत्रविश्लेषणसाध्यावचनरूपेण पठिता: सन्ति । तथाहि चतुर्दशसंख्या –

- **एकयोगनिर्दिष्टानां क्वचिदेकदेशोऽप्यनुवर्तते** ।
- **स्त्रीप्रत्यये चानुपसर्जनेन ।**
- **ग्रहणवत्ता प्रातिपदिकेन दन्तविधिर्नास्ति ।**
- **अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते** ।
- **उपपदविभक्ते: कारकविभक्तिर्बलीयसी ।**

काश्चन् परिभाषा: सूत्रविश्लेषसाधिता: परिभाषा: सन्ति । तद्यथा–

- **निर्दिश्यमानस्यादेशा: भवन्ति ।**
- **वर्णाश्रयेनास्ति प्रत्ययलक्षणम् ।**
- **पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय:।**
- **उभय निर्देशे पञ्चमीनिर्देशो बलीयान् ।**

इदमत्र त्वधेयम्–वार्तिककारेण साक्षात् वचनरूपेणोक्तपरिभाषा: काश्चन एव वाचनिकीत्वेन नागेशेनाङ्गीकृता: यथा–**"उपपदविभक्ते: कारकविभक्तिर्बलीयसी"** । अनेन प्रतीयते यत् नागेशभट्टेन त्रिविधका: अपि परिभाषा: परिभाषेन्दुशेखरे विवेचिता: ।

परिभाषेन्दुशेखरे सैव परिभाषा: नागेशेन स्वीकृता: यासां ज्ञापकन्याययुक्तिप्रदर्शनपूर्वकं वचनरूपेण च महाभाष्यकारेण विहिता:। यासां परिभाषाणामुल्लेख: महाभाष्ये न दृश्यते ता: परिभाषा नागेशेनापि अस्वीकृता: । नागेशेन सर्वासां परिभाषाणां कार्यदृष्ट्या प्रकरणत्रये वर्गीकरणं विहितम् । तच्च प्रकरणम् –

- **शास्त्रत्वसम्पादकम्**
- **बाधबीजकथनम्**
- **शास्त्रशेषवचनम्**

एषु प्रकरणेषु शास्त्रत्वसम्पादकस्य मुख्यत्वम् वर्तते। अत्रोक्ता: परिभाषा: तत्र-तत्र यथावश्यकं पदपदार्थपूरणेन सन्देहनिराकरणे क्वापि कस्यचिद्धर्मस्यारोपणे शास्त्रस्य शास्त्रं यथार्थबोधजनकत्वं सम्पादयन्ति।

द्वितीये प्रोक्ता: परिभाषा: विरुद्धेषु शास्त्रेषु केन किं बाध्यतामिति जिज्ञासायां बाध्यबाधकभावस्य बीजमुपस्थापयन्ति।

तृतीये शास्त्रशेषकथने ता: परिभाषा: निरूप्यन्ते या: पूर्वोक्तप्रकरणद्वये निरुपितावशिष्टा: वर्तन्ते । एवं श्रीमता नागेशभट्टेन परिभाषेन्दुशेखरे परिभाषाविषयकं सर्वसिद्धान्तं सम्यक् समीक्ष्य यथार्थपर्यालोचनपूर्वकं सविशदं तत्स्वरूपम् उपस्थापितम् ।

**सन्दर्भग्रन्था:** :-


1. वैयाकरणसिद्धान्तकौमुदी, सं. गिरिधर शर्मा, मोतीलाल बनारसी दास प्रकाशन, वाराणसी।
2. परिभाषेन्दुशेखरम् (भूति टीका) सं. एस. तात्याचार्य, चौखम्भा सुरभारती प्रकाशन, वाराणसी।
3. परिभाषेन्दुशेखरम् (हिन्दी व्याख्या) आचार्य विश्वनाथमिश्र:, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
4. महाभाष्यम्, पतञ्लजी, चौखम्भा सुरभारती प्रकाशन, वाराणसी।
5. परमलघुमञ्जुषा, सं. जयशंकरलाल त्रिपाठी, चौखम्बा प्रकाशन, वाराणसी।
6. वैयाकरणसिद्धान्तकौमुदी, (बालमनोरमा टीका) सं. गिरिधर शर्मा, मोतीला
7. ल बनारसी दास प्रकाशन, वाराणसी।
8. वैयाकरणभूषणसार:, कौण्डभट्ट, चौखम्बा प्रकाशन, वाराणसी।